च्यं केवलरजतत्वप्रमात्वस्य कार्य्यतानवच्छेदकत्वेनापादनासंभवादिति उच्यते तद्धर्म्मसन्निकर्षे एव तत्प्रत्यक्षप्रमामात्रे गुणः त
स्य च सामानाधिकरण्यं प्रत्यासत्तिः तद्घटकः संबंधः कारणस्यादिकारणता कार्य्यस्य विशेष्यतेति क्वचिदेवाधिकरणे प्रमाणाप
रत्र शुक्तौ इदं रजतमित्यादि भ्रमकाले शंखे पीतत्वादि भ्रमकाले च शुक्तित्व घेत्यादि प्रत्यक्षप्रमानुत्पादः प्रतिबंधकीभूतपित्तादिदो
षविशेषसत्त्वात् नचैवं तादृशदोषविशेषाभावस्यैव हेतुत्वे गुणस्य लेपितस्यावश्यकत्वादिति वाच्यं तादृशदोषविशेषाभावस्य
जन्यघेत्यादिप्रत्यक्षत्वावच्छिन्नं प्रत्येव हेतुत्वात् नच तत्र प्रमात्वं तदभावः तत्त्वे घेत्यादिनिर्विकल्पस्याप्यनुत्पत्तेः नच सर्वसामान्य
सामग्री जनिकास्तु किं विशेषसामग्रीकल्पनेन अस्तु वा सैव सामान्यसामग्री प्रत्यक्षप्रमात्वावच्छिन्नं प्रत्यपि हेतुः किंमामग्य

प्र·ख·
१४०

तरकत्वे तेन सामान्यविशेषयोर्नैकसामग्रीप्रयोज्यत्वमिति प्रवादस्य निर्युक्तिकत्वादिति वाच्यं भ्रमस्यापि तादृशे प्रत्यक्षमान्यप्रतिबंधकदो
षविशेषशुक्तित्वादिविरहिणोच्छुक्तित्वादिप्रमानुत्पादेन तदुक्तरूपगुणहेतुत्वस्यावश्यकत्वात्। भ्रमजनकीभूतदोषश्च न प्रमाप्रतिबंधकः
येनावश्यकत्वात्तदभाव एव कारणं स्यादिति मणिकृतोभिगर्वः। सन्निकर्षत्वस्यैकस्याभावात् अननुगतः परमत्र विभवनीयः। केचित्तु त
द्व्याप्यसन्निकर्ष एव तत्प्रत्यक्षप्रमाहेतुः उक्तसामानाधिकरण्यप्रत्यासत्तेरिति तदसत् व्याप्यत्वप्रवेशे गौरवादिति दिक्॥ ननु तथापि यथा
र्थलिंगपरामर्शस्य प्रमात्वमिति न गुणत्वसंभवः वह्निव्याप्यधूमवान् पर्वत इति यथार्थपरामर्शेन बाधानवतारदशायां लाघवप्रतिसंधा
नसहकारेण वा पर्वतो महानसीयवह्निमान् इत्यनुमितिजननकाले प्रमानुमितिप्रसंगात् एवं वह्निव्याप्यधूमवान् पर्वत इति यथार्थप
रामर्शेन पर्वतीयवह्निबाधबुद्धिसहकारेण पर्वतो महानसीयवह्निमान् इत्यनुमितिजननकाले प्रमानुमित्युत्पत्तिप्रसंगाच्च कूटलिंग
स्थलीयप्रमानुमितौ व्यभिचाराच्च किंच गंधप्रागभावकालावच्छिन्नो घटो गंधवानित्यादावपि प्रमानुमित्युत्पत्त्यापत्तिः परामर्शस्य यथा
र्थत्वादिति मैवं बाधभ्रमाभावलाघवभ्रमाभावयोः पृथक्हेतुत्वेनाद्यदोषद्वयानवकाशात् न चैतयोर्हेतुत्वोपगमे कृततादृशगु हे·ख· १४०
णेनेति वाच्यं असत्यपि लाघवप्रतिसंधाने बाधभ्रमे साध्यविरहिनि पक्षे परामर्शात् प्रमानुमित्यनुत्पादात्तादृशगुणहेतुत्वस्यावश्यकत्वात्

नवा तृतीयः तत्रेश्वरीयव्याप्यप्रमायाः सत्वात्साध्यवह्निद्रोण्यकत्वस्यैव कल्पकत्वे परामर्शनिष्ठयाथार्थ्यतया कूटलिंगपरामर्शस्यापि यथार्थत्वाच्च
वस्तुतो वस्तुगत्या यत्तद्व्याप्यं तत्प्रमात्वप्रमानुमितौ गुणः घटो द्रव्यं सत्वादित्यादिकूटलिंगपरामर्शस्यापि युक्तेष्यं ततो घटत्वादेरेवतादृशास्य
ज्ञानसत्वात् नचात्र जलत्वेनैव पर्वतपक्षीकृतकूटलिंगेन जलं वह्निमदिति वह्निप्रमात्वमिति तत्र कागतिरिति वाच्यं वह्निसामानाधिकरण्यपक्षता
नेसामान्यतोऽधिकरणत्वरूपेण पर्वते वह्निव्याप्यस्य वह्नेरेवाभावात्कथमिदं सत्तापि तिचेत् फलत्वबलादेवन च हेतुभेदेन हेतुतावच्छेदकसंबंध
भेदेन च व्याप्तिभेदादननुगमः साध्यतावच्छेदकसंबंधेन तद्वदन्यावृत्तित्वरूपाया व्याप्तेरत्रप्रवेशात् नचैकैव त्वान्न यिनीत देभावः तत्र प्रमात्वस्य
कार्य्यतानवच्छेदकत्वाद्यवित्तिनीयतद् प्रमाया अप्रसिद्धेः। अस्तु वा तत्र तत्सामानाधिकरण्यत्वेनैवानुगमः नवा चतुर्थ गंधप्रागभावकालावच्छि
न्नघटो गंधवानित्यस्यापि प्रमात्वाद्गंधप्रागभावकालावच्छिन्नत्वविशिष्टसमवायसंबंधेनैव प्रकृतसमवायसंबंधेनापि घटगंधस्य प्रका
रतान्यपगमादितिदिक्। ननु तथापि यथार्थसादृश्यज्ञानस्य प्रमोपमितौ न गुणत्वसंभवः खरस्य धर्म्माऽश्वद्वदस्यतिदेशवाक्यार्थस्य प्र
भवप्रमोपमितौ व्यभिचारात् तत्र च सादृश्यज्ञानस्य प्रमोपमितौ जन्यप्रमोमितावि दनितात्वमिति वाच्यं गोभदृशः खरदूस्यतिदेशवाक्य
प्रमोपमितौ व्यभिचारात् खरे गोसादृश्यप्रमायाऽभावात् नच गोसमानधर्म्मवत्वं येनकेनापि धर्म्मेण खरेप्यस्तीति वाच्यं अप्रमासाधा

प्र॰ख॰
१४१

रण्यात्मैवं तत्प्रकारकप्रमोपमितौ तद्व्यभिचारी यात्वघु धर्मः ईश्वरीयसाधारण्यात् तत्प्रमैव गुणः सच क्वचित्साक्षात् क्वचिदन्यद्वारा यस्तत्पलक्ष
णपर इति न चैवं प्रमासामान्यप्रत्येव ईश्वरीयसाधारणव्याप्यप्रमाया गुणत्वसंभव इति वाच्यं ईश्वरीयसाधारणग्राह्यप्रमावदितरस्या अपि
तथात्वेक्षतिविरहात्। ननु यथापि यथार्थवाक्यार्थज्ञानस्य शाब्दप्रमायां न गुणत्वसंभववाक्यपदं हि यत्किंचित्परं वा प्रकृतवाक्यपरं वानाद्यो
ऽतिप्रसंगात् नांत्योऽननुगमात् तदुक्त। बालकवाक्यजन्यशाब्दप्रमायां व्यभिचाराच्चमैवं वाक्यार्थज्ञानयदेतन्न तत्त्व। ज्ञानस्योक्तत्वात्तथा
च तच्छाब्दप्रमायां यथार्थत्वत्वज्ञानमेव गुणः विशेष्यतासंबंधेन सामानाधिकरण्येन प्रत्यासत्तिरिति यत्र तदस्ति तत्रैव शाब्दप्रमाशुकबालका
दिस्थले ईश्वरीयमेव तत्तुल्यमिति न काप्यनुपपत्तिः न चान्योन्याश्रयः शाब्दप्रमायां यथार्थवाक्यार्थज्ञानरूपगुणजन्यत्वे सिद्धे वैदिकप्रमा
हेतुवाक्यार्थप्रमारूपगुणाश्रयत्वेनेश्वरसिद्धिरिति वाच्यं प्रकारांतरेणापि ईश्वरसिद्धेरुक्तत्वात् ज्ञानस्यासार्वत्रिकत्वेन शुकादिस्थले यथार्थ
वाक्यार्थज्ञानाभावग्रहासत्त्वे शाब्दाकारणत्वग्रहसंभवाच्च अन्यथा पर्वते दोषवह्निः संदेहात् धूमकारणत्वग्रहोऽपि तत्र न स्यादिति संक्षेपः हेरंब॰
विशेषदर्शनं विशेषप्रमा तेन पुरुषे प्रमा स्थाणुत्वव्याप्यवत्ताज्ञानात्तत्र न स्या[illegible]त्वप्रमाविशेषदर्शनहेतुरेवेति विशेषदर्शनसाम १४१
ग्र्येवेत्यर्थः तद्धेतोरेवेतिन्यायादिति भावः ननु एवं यत्र विशेषदर्शनाभावः कथं तत्र न प्रमेत्यत आह तद्व्यतिरिक्तेतिन व्यतिरेकाद्विशेष

दर्शनसामग्रीव्यतिरेकात्तदभावः प्रत्यक्षप्रमायाऽभावः अन्यथाविशेषदर्शनसामग्र्यभावासत्वेन तु विशेषदर्शनमपि विशेषदर्शनाद्धेतुरेवेति
विशेषदर्शनस्य हेतुत्वं दुष्परिहरमित्यत आह तत्रापीति विशेषदर्शनेपीत्यर्थः। तदपेक्षायां विशेषदर्शनापेक्षायां अनवस्थाना। द्वितीयद्यपि विशे
षदर्शनस्य प्रत्यक्षत्वनियमाभावात्वानवस्थाप्रसंगः तथापि तन्मूलीभूतप्रत्यक्षमात्रस्य तत्प्रसंग इति भावः अथ व्याप्यदर्शनसामग्री चेत्कारणं त
दा तत्पूर्वं व्याप्यदर्शनसामग्रीसत्वेन सर्वस्या एव व्यापकप्रत्यक्षप्रमाया व्याप्यवत्ताविषयकत्वनियमेन पुरुषत्वप्रत्यक्षप्रमाया अपि पुरु
षत्वव्यापकवादिमत्वविषयकत्वनियमात् लिंगोपहितलैंगिकभाननये ऽनुमितावित्र प्रामाण्यसंशयोनस्यात्प्रामाण्यवच्छेदकत्वेन गृही
तस्य वादिमद्विशेष्यकत्वावच्छिन्नपुरुषत्वप्रकारकत्वस्यानुव्यवसायेन निश्चयादित्याह एवमिति एवं व्याप्यदर्शनसामग्र्याः प्रत्यक्ष
मात्रकारणत्वे व्याप्यविषयकव्यापक प्रत्यक्षनियमे व्यापकप्रत्यक्षमाया व्याप्यविषयकत्वनियमेन अनुमिताविवेत्ति लिंगोपहित
लैंगिकभाननयेऽनुमिताविवेत्यर्थः वादिमानितियद्यपि अनुव्यावसायेन पुरुषत्वव्यापकवादिमाद्विशेष्यकत्वावच्छिन्नपुरुषत्वप्रका
रकत्वग्रहे तद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वमभिगृह्यतां जन्यसामाग्रीकत्वादिति प्रामाण्यस्य तस्त्वापत्तिः तथापि अनुव्यवसायेन
तद्विशेष्यकत्वावच्छिन्नत्वं तत्प्रकारकत्वेन गृह्यते प्रामाण्यसंशयानुपपत्तेः विधेयोद्देश्यतावच्छेदकत्वेन भावसमानयोधर्मः

प्र॰ रव॰
१८२

तद्वद्विशेष्यकत्वावच्छिन्नत्वंविधेयप्रकारकत्वेगृह्यतएवबाधकाभावादन्यथाअनुव्यवसायानंतरंप्रामाण्यस्यैवास्मिन्रजतत्वप्रकार
कंनत्वेत्यपिसंशयःस्यादितिभावः ननुविशेषदर्शनस्यहेतुत्वेपूर्वंव्याप्यवत्तोपनयसत्वात्प्रत्यक्षमात्रस्यैवउपनीतव्याप्यवत्त्वविषयकत्व-
नियमात्कथंकुत्रचित्पुरुषत्वप्रत्यक्षेप्रमायांप्रामाण्यसंशयइतिउक्तदोषतादवस्थ्यमितिकुत्रचित्प्रामाण्यसंशयानुरोधात्तद्विशेषद
र्शनविनापिप्रत्यक्षप्रमास्वीकार्य्यातत्कथमित्याशंकतेतत्वापीतिअपिभिन्नक्रमेविशेषदर्शनंविनापीत्यर्थःतस्यहेतुत्वादितितत्रचप्रा
माण्यसंशयएवनभवतीतिभावःममापीतितद्धेतुःतत्सामग्रीतत्रैवसंशयविपर्य्ययोत्तरप्रत्यक्षप्रमायामेवतत्वेतत्तांविशेषदर्शनहेतु
नांतादृशप्राप्तिवंधसंशयोत्तरप्रत्यक्षतद्दर्शनेषुचव्याप्यदर्शनंतंविशेषदर्शनसामग्र्यत्वेपिव्याप्यदर्शनसामग्रीत्वेऽनुगमेलाघवा
द्विशेषदर्शनत्वेनैवकारणत्वंनतुत्वेनगौरवात्‌अनुमित्यात्मकविशेषदर्शनस्यचतत्सामग्र्याःप्रत्यक्षजनकत्वासंभवाद्धेतिनविषये।
नुमितिसामग्र्याबलवत्वेनव्याप्त्यनुमितिरेवप्रथममुत्पादात्इतिभावःयद्यप्यत्रतद्विशेष्यकतद्व्याप्यप्रमात्वेनकारणतातद्विशेष्यकतद्वि
परीतत्वानोत्तरतद्विशेष्यकतत्प्रत्यक्षप्रमात्वेनकार्य्यतासमवायघटितसामानाधिकरण्यंप्रत्यासत्तिःव्यक्तिविशेष्यकरजतत्व हेरंब॰
प्रमात्वादेवप्रसिद्धत्वेनकार्य्यतावच्छेदकत्वासंभवेपियावद्विशेषसामग्रीबाधादेवनपुंक्ताशौरजतत्वादिप्रमोदयइतिप्रवेशःकार्य्यका १८२

रणाभावो न संभवति तेन संशयोत्तर तत्संशयप्रमाया व्यभिचारात् आलोकाद्यसाध्यीन संशयविपर्य्ययोत्तरमालोकादिसमवधाने मति ज्ञा
यमाने प्रत्यक्षप्रमानिश्चये पुरुषत्वाद्यवच्छेदकीभूतकरादिमत्त्वज्ञानाज्ज्ञायमाने संशयविपर्य्ययोत्तरपुरुषत्वादिप्रत्यक्षप्रमानिश्चये च
व्यभिचारात् पुरुषत्वादिगाप्यत्वेन तत्र ज्ञानाभावात् व्याप्तत्वननुगमे नाननुगमात् अथास्तु गत्या यन्तव्याप्यं स्वरूपरसाधारण्यं प्रमात्वेने
वकारणतात्तद्विपरीतज्ञानोत्तरतत्प्रत्यक्षप्रमात्वेन च कार्य्यताविशेष्यताघटितसामानाधिकरण्यं प्रत्यासत्तिः संशयोत्तरसंशयस्थले
तस्यापि स्वव्याप्यत्वेन पूर्वसंशयस्यैव तद्व्याप्यप्रमात्वात् अत एव संशयोत्तरमालोकसमवधाने सति ज्ञायमाने प्रत्यक्षप्रमानिश्चये ऽव
छेदकीभूतकरादिमत्त्वज्ञाना ज्ज्ञायमाने विपरीतज्ञानोत्तरतत्प्रत्यक्षनिश्चये च न व्यभिचारः संशये ऽवच्छेदकीभूतकरादिमत्त्वज्ञानयो
रेव वस्तुगत्या तद्व्याप्यप्रमाकारणत्वात् सर्व्वत्रेश्वरीयतद्व्याप्यप्रमामादायैव विशेष्यतासंबंधेन तद्व्याप्यप्रमायाराच सुलभत्वात् तच्च [illegible] अत
एव तदभावनिश्चयोत्तरमालोकसमवधाने सति ज्ञायमाने तत्प्रत्यक्षे प्रमानिश्चये तत्र तद्व्याप्ये तद्व्याप्यताप्रमा ज्ञायमाने विपरी
तज्ञानोत्तरप्रत्यक्षप्रमानिश्चये च तद्व्यभिचारः ईश्वरीयतद्व्याप्यप्रमाया एव सुलभत्वात् न चैवं पुरुषत्वादिविपरीतनिश्चयोत्तरं वि
नापि व्याप्यदर्शनादिति पुरुषत्वादिप्रत्यक्षप्रमापत्तिः ईश्वरीयतद्व्याप्यप्रमासत्त्वादिति वाच्यं तद्विपरीतज्ञानोत्तरतत्प्रत्यक्षनिश्च

प्र॰ख॰ २४३ यत्वेनकार्य्यतातद्विशिष्टज्ञानाविरोधित्वेनचकारणतेतिसामान्यकार्य्यकारणभावांतरसत्वेनसामानाधिकरण्याभावादेवतदनुपपत्तेः
तद्विपरीतप्रमोत्तरंविनापिव्याप्यदर्शनादिकंप्रमात्मकतत्प्रत्यक्षनिश्चयवारणायसामान्यकार्य्यकारणभावस्यावश्यकत्वात्प्रमानु
निरूपकसंबंधेनतद्वदन्यावृत्तित्वरूपायाराव्याप्तिरत्रप्रवेशाद्व्याप्त्यननुगमेनापितदननुगमः केवलान्वयिस्थलेपूर्वोक्तैववीतिरि
तिचेन्नतथासतिप्रमासामान्यंप्रत्येवतेनरूपेणकार्य्यकारणभावस्यस्ववचक्ततयाकार्य्यतावच्छेदकदिविशिष्टतद्विपरीतज्ञानोत्तरत्वप्रवेश
स्यव्यर्थत्वापत्तेः मूलेसंशयविपर्य्ययोत्तरप्रमापर्य्यंतानुधावनस्यासंगतत्वापत्तेस्तथापितद्विशेष्यतद्व्याप्यप्रमात्वेनतद्विशेष्यकत
द्विपरीतज्ञानोत्तरतद्विशेष्यकतत्प्रत्यक्षप्रमात्वेनैवकार्य्यकारणभावः उत्तरत्वंचालोकाभावाधीनविपरीतनिश्चयादिव्यावृत्तंसंसर्गमा-
र्यादयाकार्य्यतावच्छेदकघटकंतेनालोकादिसमवधानाधीनतदुत्तरप्रत्यक्षप्रमायांनव्यभिचारस्तथातद्व्याप्यतद्व्याप्यत्वभ्रमाज्ञा
यमानेतद्विपरीतनिश्चयोत्तरप्रत्यक्षेव्यभिचारः यत्रयत्रप्रत्यक्षेव्यभिचारसंभवस्तत्रव्याप्याद्युत्तरत्वस्यैवसंसर्गत्वात् द्वातद्विशेष्य
कतत्त्वांशव्याप्यप्रमात्वेनकारणतातादृशतद्व्याप्यप्रमोत्तरतद्विशेष्यकतत्प्रत्यक्षप्रमात्वेनकार्य्यतासंशयविपर्य्ययोत्तरप्रमाप हेरंब॰
दंचतद्व्याप्यप्रमोत्तरतादृशप्रमापरमितिमपिकृतोनिगर्वः। तद्धितिएवंसंशयाद्युत्तरप्रत्यक्षप्रमायांविशेषदर्शनस्यकारण २४३

त्वे तथात्वेपि अनुमितिसामग्री सत्वेपि प्रत्यक्षेति सिषाधयिषाविरहविशिष्टतद्विशेष्यकतद्विधेयकलौकिकप्रत्यक्षसामग्र्याः तद्विशेष्य
कतद्विधेयकानुमितिप्रतिबंधकत्वादित्यर्थः अनुमितिसामग्रीविरहादिति शेषः तद्विधेयके त्युपादानात्पर्वते वह्निमानित्यत्र पर्वते तप्र
त्यक्षसामग्री सत्वेपि न पर्वतस्य प्रत्यक्षं किं तु अनुमितिरेव लौकिके त्युपादानात्पर्वते वह्न्युपनीतभानसामग्री सत्वेपि वह्न्यनुमिति
रेव तत्प्रत्यक्षं केचित्तु अन्यत्र भिन्नविषयकप्रत्यक्षे तथात्वेपि अनुमितिसामग्र्याः प्रत्यक्षप्रतिबंधकत्वेपि अत्रेति समानविषयानु
मितौ प्रत्यक्षसामग्र्याः प्रतिबंधकत्वादित्यर्थः इति वदंति तन्न पुरुषत्वभ्रमस्य विषयकं प्रत्यक्षसामग्री प्रतिबध्यतावच्छेदकायाः
समानविषयकप्रत्यक्षत्वे प्रत्यक्षसामग्र्यभावरूपकारणाभावादनुमितिसामग्री विरहादेव तद्व्यभिचार इति ध्येयं। ननु प्रत्यक्षप्र
मासामग्र्या अनुमितिप्रतिबंधकत्वे किं मानमित्यत आह तत्रेति तत्र संशयोत्तरप्रत्यक्षस्थले इति पुरुषत्वेनानुमितेरित्यर्थः अत एव
तिद्वचिज्ज्ञाने विशेषदर्शनजन्यत्वादेवेत्यर्थः ज्ञातमित्यस्य ज्ञानमिति शेषः बाधकं भ्रमानुत्पादकं बोध्यं भ्रमत्वेन ज्ञाप्यं अन्यथा क
स्यचिदपि ज्ञानस्य विशेषदर्शनजन्यत्वादेवेत्यर्थः ज्ञातमित्यस्य ज्ञानमिति शेषः बाधकं भ्रमानुत्पादकं बोध्यं भ्रमत्वेन ज्ञाप्यं अ
न्यथा कस्यचिदपि ज्ञानस्य विशेषदर्शनाजन्यत्वे पुरुषज्ञानपुरुषत्वभ्रमस्यानापीति तद्विपरीतज्ज्ञानमेव तज्ज्ञानेन बाधकं

प्र॰ ख॰
१४४

मित्यर्थः॥ अनन्यथासिद्धमितिप्रमात्वेन ज्ञातं बाधकमित्यर्थः तथाच करमोजन्यपुरुषविभ्रमस्यापिप्रमात्वेन ज्ञाततत्वबोधकत्वमितिभा
वः॥ तद्व्यर्थत्वात जन्यत्वात तथाचतदनुमेयकाचित्प्रत्यक्षप्रमायां विशेषदर्शनजन्यत्वं स्वीकरणीयमितिभावः प्रमोत्तरप्रत्यक्षप्रमाप्रतिबध्या
प्यदर्शत स्याश्चेन्नव्यभिचारमशंकानिराकरोति नचेति विशेषदर्शनेपिश्वेत्यस्याप्यवतादर्शनेपितद्भावः तद्वृत्ति धर्म्मः तद्वृत्तिभ्रम
विरोधित्वमितियावत्समादित्युः प्रमोत्तरप्रत्यक्षमायाःकारणतावच्छेदकीःपीतःशंख इत्यत्र यद्विशेषदर्शनंतद्भ्रमविरोधि चेन्नतत्सत्वेपी
तःशंख इति प्रमोत्पत्तेरितिभावः यद्यप्यत्र श्वेत्यविशेषदर्शनमपिभ्रमविरोध्येव दोषविशेषाद्यजन्यभ्रमंप्रत्येवतस्यविरोधित्वात्तथापित
द्विशेषदर्शनं प्रत्यक्षभ्रमविरोधित्वं इतितत्प्रत्यक्षभ्रमविरोधित्व तद्भ्रमोत्तरप्रत्यक्षप्रमाकारणतावच्छेदकमित्यर्थः तथाच पीतःशं
ख इत्यग्निमविशेषदर्शनंतत्प्रत्यक्षभ्रमविरोधीतिभावः ननु श्वेत्यविशेषेदर्शनकुतोनपीतत्वप्रत्यक्षप्रमविरोधि इत्यत आह प्रत्य
क्षेति प्रत्यक्षविशेषदर्शनं प्रत्यक्षविपरीतनिश्चयः तदेवविरोधेन तु व्याप्यदर्शनं आनुमानिकविपरीतनिश्चयदित्यर्थः॥ हिद्गुमोहेति
तथादर्शनात्प्राचीनत्वव्याप्यस्पर्शोदयशालित्वचतीयमितिविशेषदर्शनाद्धंनगौर इति आनुमानिकविपरीतनिश्चययोश्चप्रतिबं हेरं॰ब॰
धकदर्शनात् ननु प्रत्यक्षात्मकपीतत्वविपरीतनिश्चयः एवकुतोनसंभवतीत्यत आह तच्चेति तत्र प्रत्यक्षात्मकतद्विपरीतनि १४५

श्चय श्चयद्यपि प्रत्यक्षभ्रमे प्रत्यक्षविपरीतनिश्चयत्वावकुतो न संभवतीत्यत आह तत्त्वविरोधिइति यद्विशेषभ्रमविरोधितद्भावः प्रमाहेतुरिति त
[illegible]ः प्रमाहेतुरिति यथोऽसंगतविशेषदर्शनस्य प्रत्यक्षप्रमोविरोधित्वात्तथापि यत्प्रत्यक्षभ्रमविरोधि तद्वृत्ति तत्प्रत्यक्षभ्रमविरोधित्वं तद्भ
मोत्तरप्रत्यक्षप्रमाकारणतावच्छेदकं तत्त्वप्रत्यक्षकृते विशेषदर्शनं विपरीतनिश्चयएव न विशेषदर्शनमित्यर्थः ननु विशेषदर्शनं कथं न प्रत्य
क्षभ्रमविरोधीइत्यत आह प्रत्यक्षेति प्रत्यक्षविशेषदर्शनं प्रत्यक्षविपरीतनिश्चयस्तदेवविरोधीत्यर्थः किंच यद्विशेषदर्शनं भ्रमविरोधि
यत्प्रत्यक्ष[illegible]प्रमानुपधायकवस्तुतो यद्व्यवहितोत्तरं यत्प्रत्यक्षभ्रमो न भवतीति यावत्तद्भावः तत्र स्वरूपं तद्विशेषदर्शनमिति या
वा। प्रमाहेतुश्च तद्भ्रमोत्तरप्रत्यक्षप्रमाफलोपधायकं यद्विशेषदर्शनव्यक्तेरव्यवहितोत्तरं यत्प्रत्यक्षभ्रमो न भवति सेचविशेषदर्शनव्य
क्तिः तद्भ्रमोत्तरप्रत्यक्षप्रमाफलोपधायकेति वस्तुस्थितिरिति संबंधइत्यर्थः प्रकृते श्वैत्यस्य विशेषदर्शनं एवं न भवति तदुत्तरमपि पीतत्वभ्रमस्यउ
त्पत्तेरिति भावः ननु श्वैत्यविशेषदर्शनोत्तरं कथं पीतत्वभ्रमः विशेषदर्शनस्य भ्रमप्रतिबंधकत्वादित्यत आह प्रत्यक्षेतीत्यर्थस्तु पूर्ववत् अथ
पीतत्वविपरीतप्रत्यक्षनिश्चयएवात्र कथं न जायत इत्यत आह तच्चेति तथा च विशेषदर्शनप्रमात्वेन कारणता प्रमोत्तरप्रत्यक्षप्रमात्वेनैव का
र्यता तथापि तादृशविशेषदर्शने सत्येव पीतः शंख इत्यनंतरं न श्वैत्यप्रमा दोषरूपप्रतिबंधकसत्त्वादिति भावः अनुमित्यादिरिति प्रमा इति

प्र·ख·
१४५ दोषः सत्वेति यथा अपरामर्शादिरूपगुणस्य कारणत्वमित्यर्थः ननु यत्र तेषां भ्रमः प्रमा च नास्ति तत्र अनुमित्यादिसामान्यकरणपरामर्शा-
द्यभावादेव तेषामभावः किं गुणस्य कारणत्वेन इति चेन्न अनुमित्यादिभ्रमे विपर्यस्यार्थपरामर्शादिरूपगुणाभावस्य च कारणमस्त्येव दोषश्च
तत्र यथार्थपरामर्शाद्यभावोस्ति अयथार्थपरामर्शादिरूपदोषोपि नास्ति तत्र अनुमित्यादिसामान्यकरणपरामर्शाद्यभावात् एव तेषा
मभावः किं वा धस्य कारणत्वेन इत्यस्यापि सुवचत्वेन विनिगमनाविरहात् उभयोरपि हेतुत्वात् वेदे तु वैदिकस्थले तु भ्रमादि भ्रमप्रमादो विप्र
लिप्साकरणापाटवं प्रमायां यथार्थशाब्द प्रमा लोके लौकिकस्थले भ्रमाद्यभावस्य च भ्रमादभावस्तत्रैव तत्रैव हि लौकिकस्थले उभयोरेव कै
सत्वेन लाघवात् यथार्थवाक्यार्थज्ञानस्यैव हेतुत्वेन न्यूनत्वादित्यर्थः अन्यथासिद्धत्वात् अन्यत्र न्यूनत्वाद्यन्यथासिद्धत्वात् इदं सोप
यार्थशाब्दबुद्धिजनकः अन्यथा यथार्थवाक्यार्थज्ञानं विना तादृशवाक्याप्रयोगे तत्र लौकिकस्थले वक्तृज्ञानं वक्तृवाक्यार्थज्ञानं तत्
स्य वाक्यार्थज्ञानस्य अहेतुत्वात् वाक्याहेतुत्वात् भ्रमाद्यभावसत्वे यथार्थशाब्दबोधोत्पत्तिः भ्रमादिसत्वे तदनुत्पत्तिरिति सोपि कारणमि
त्यभिप्रायः चात अस्तु चेति न चेति नित्यनिर्दोषत्वात् नित्यविशिष्ट भ्रमादिदोषाजन्य आनुपूर्वीमत्वात् प्रामाण्योपपत्तौ प्रमाजनकत्वो उहेरंच·
पपत्तौ अपरिहृतः नत्वतः फलमुखस्येति कार्य्यकारणभावग्रहोत्तरकालीनमानवत्वे स्वज्ञानस्येत्यर्थः कथं तस्या दोषत्वमित्यत १४५

आनुपूर्व्वमितिकारणतायांपूर्व्वकत्वानुपस्थित्याकार्य्यानुपस्थित्याकारणतायांरुसमयेगौरवज्ञानाभावाभावादित्यर्थः उक्तका
र्य्यकारणभावस्यव्यभिचारमाशंकतेलौके इति लौकिकानुपूर्व्यामित्यर्थः ननु लौकिकस्यत्वे त्वाध्यावात् शाब्दप्रमात्वेनकार्य्यताव
तु यथार्थवाक्यार्थज्ञानत्वेन कारणतेति यदुक्तं तद्वेदिकस्यत्वे व्यभिचारि वक्तुरश्रूयमानत्वेन प्रमाणाभावात् इदस्य वक्तुरभावात् अतो
लौकिकस्यत्वेपि भ्रमादिदोषाजन्यवाक्यत्वेनकारणता इत्येवाह अथेति कर्तृस्मरणादेः अश्रूयमानकर्तृकत्वादेः वाधकासकृत्तक
त्वेवाक्यौधतन्निर्दोषत्वेवाक्यार्थज्ञानत्वेनवक्तुरश्रूयमानत्वेनप्रमाणाभावात् इदस्यवक्तुरभावेच नवेदिकस्यत्वेव्यभिचारादितिभावः ।
अपौरुषेयस्यदोषाजन्यत्वेकिंमानमित्यत आह वेदेत्विति त्यत्वेनेति नित्यानुपूर्वीकत्वेनेत्यर्थः यथाश्रुतं तु न सम्यक् केवलनित्य
त्वस्य लौकिकसाधारणत्वात् । निराकरिष्यमाणत्वात् इति प्रतिमन्वन्तरे चैषा श्रुतिरन्या विधीयते एवं यतो वेदांश्च इत्यादिना वेदस्यापि
कृतकतेरित्यर्थः दोषाजन्यवाक्यत्वेन कारणतायां शाब्दप्रमात्वेन कार्य्यतायां तत्र स्यव्यभिचारमाशंकते भ्रांतेति संवादाघटादिरूपविषयस्य
बाधितत्वात् भ्रमाणेशाब्दप्रमाजनकेतदभावा दोषजन्यत्वाभावात्तथा च तज्जन्यप्रमायाव्यभिचार इतिभावः देवेति चैत्यवंदनं इत्या
साधनमित्यादिष्टसाधनतादिज्ञानंविनाप्रयुक्तचैत्यवंदेत्यादिकंवाक्यमित्यर्थः शुकेति वह्निनासिंचतीत्यादिशुकबालकवाक्यमि
६

प्र॰ख॰ १७६ त्यर्थः प्रमाणं स्यात् तच्छाब्दप्रमाजनकं स्यात् ननु शाब्दप्रमानुपजीवि प्रमाणबाधितात्मकेतरवाक्यत्वेन कारणता शाब्दप्रमात्वेन कार्य्यता
वाच्या वेदस्तु वेदस्त्वेव[illegible] भवत्येव तथा च वह्निना सिंचतीत्यादि शुकवालकादिवाक्ये शाब्दानुपजीवि प्रमाणं प्रत्यक्षादि प्रमाणमेव
तद्बाधितार्थकत्वेन न तदितरदिति नात्र व्यभिचार इत्यत आह प्रमाणैप्रमाण्यानपेक्षत्वेन प्रमाणबोधितार्थकतरत्वे तत्र वह्निना सिंचती
त्यादिवाक्यार्थस्तु भ्रमजनकबोधितरा एव न प्रमाणबोधित इति भावः यथार्थवा वाक्यार्थज्ञानत्वेन कारणता शाब्दप्रमात्वेन कार्य्य
तावाक्यं तु व्यापार इति बोध्यं रात तस्यैव न व्यभिचारमात्रं न्निति वाक्यं पयसा सिंचतीत्यादिवाक्यमित्यर्थः । कथं प्रमाणं कथं प्रमाज
नकमित्यर्थः गुणजन्यत्वाभावात् यथार्थवाक्यार्थज्ञानजन्यत्वाभावात् न चेति गुणाजन्यत्वात् यथार्थवाक्यार्थज्ञानजन्यत्वात् व
क्तृता सम्यग्विषयत्वाच्च वक्तु किंचित्तात्पर्य्यकत्वाभावाच्च वक्तुः किंचिदुद्देश्यात् उच्चरितत्वाभावाच्च यावत् इदंतु शुकवाक्यस्य प्र
माजनकत्वाभावे हेतुः ननु भ्रांतप्रतारकवाक्यस्य तस्य वक्तुवक्तुः किंचित्तात्पर्य्यकत्वात्तदिति शुकादिवाक्यं भ्रांतप्रतारकवाक्यं च न प्र
माजनकमित्यर्थः संवादेन अबाधितार्थविषयकशाब्दबोधजनकत्वेन साध्यबाधादिति प्रमाजनकत्वाभावस्य बाधितत्वादित्यर्थः अ हरं॰ख॰
यवक्तृज्ञातवाक्यार्थबोधोन्मेयोग्यता कुत्रचिदपि तस्या अभावात् सर्वत्रैवावश्यकत्वात् ज्ञाततात्पर्य्यकिंचिद्वाक्यार्थेबाधसत्त्वात् किंतु प्रकृ १७६

तद्वाक्यकारणीभूतवक्तृज्ञानविषयवाक्यार्थबोधयोग्यतावाच्या तथा सत्यारु घटवतीति घटवति घटो नास्तीति भ्रमस्यभिन्नविषयत
या घटोस्तीति भ्रांतप्रतारकवाक्ये ऽहेतुत्वादित्यर्थः तथा च तद्विषयस्य बाधितात्वकांक्षतिरिति भावः कुत्रचिद्घटवति घटोस्तीति पाठः
तदा घटवत्तिभ्रमस्यभिन्नविषयतया घटोस्तीति भ्रांतप्रकारकवाक्ये अहेतुत्वादित्यर्थः ननु शुकादिवाक्यस्थले भ्रांतप्रकारकावा वाक्या
स्थले च प्रकृतवाक्यकरणीभूतवक्तृज्ञानविषयवाक्यार्थाप्रसिद्धः तद्वाधरूपयोग्यतायाः अभावादेव नष्टग व्द प्रमादूत्पत आह किंचेति
वाक्यार्थबोधः प्रकृतवाक्यार्थबोधत्वाघवादेकपदार्थे परपदार्थसंसर्गबोधमात्रं योग्यता न तु प्रकृतवाक्य स्यत आह संवादेनेति अबाधा
क्यकारणीभूतवक्तृज्ञानविषयत्वमपि विशेषणं गौरवादित्याशयः वाक्यार्थस्य भ्रांतप्रतारकवाक्यार्थस्य शुकादिवाक्यस्थले भ्रांतप्रता
रकवाक्यस्थले च ननु शुकादिवाक्यादेव तु अन्वयबोधः किंतु स न प्रमादुत्पत आह संवादेनेति अबाधितार्थविषयकत्वेनेत्यर्थः यथार्थ
लिङ्गपरामर्शत्वेन कारणता प्रमात्वमिति हेतुना कार्य्यता एतस्य व्यभिचारमाशंकते एवमिति प्रत्यभिज्ञानात् यो वह्निरनुमितः स एवात्र इ
ति प्रत्यभिज्ञानादित्यर्थः गोत्वादीति गोत्वाव्याप्य द्रव्यत्ववतीयमित्यादि भ्रमपरामर्शजन्यगोत्वाद्येकव्यक्तिसाध्यकप्रमानुमितौ
असंभवाच्च व्याप्त्यंतरविषयकत्वासंभवाच्चेत्यर्थः तथा च रातस्यामेवानुमितौ व्यभिचार इति भावः अथात्र गोत्वानुमितिरेव न भवति किं

त्वन्यगो तादात्म्यप्रमानुमितिरेव जायत इति निरोकरोति नापीति संसर्गो बोध्य इति संसर्गोपि समवायादितादात्म्यारोपाख्यास्तु गोत्वव्या
प्तिभानादित्यर्थः तथा च यत्संबंधेन यस्य व्याप्तिज्ञानं तत्संबंधेन तस्यानुमितिः प्रकृते तु समवायेन गोत्वव्याप्तिज्ञानं कथं तादात्म्येन गोत्
त्वमितीति भावः अनु धूमप्रमाद्वह्निमति वह्न्यनुमितिभ्रम एव वह्निव्याप्यधूमवत्त्वविषयकत्वात् तथा च कथं व्यभिचार इत्यत आह लिं
गेति तथा च प्रमानुमितित्वेन कार्य्यता यथार्थलिंगपरामर्शत्वेन कारणता तस्य तत्र व्यभिचारस्तदवस्थ एवेति भावः भ्रांतेति आप्तोक्त
त्वात् यथार्थवाक्यार्थज्ञानजन्यत्वात् यत्प्रमाणशब्दः तत्र यथार्थवाक्यार्थज्ञानजन्यत्वमिति नियमात् भ्रांतप्रतारकं वा किं शुकादिवा
क्ये च ईश्वरीयवाक्यार्थज्ञमेव जनकमित्यर्थः नन्वेवं चेत् शुकादिवाक्ये तत्तुल्यमेव जातमित्यत आह शुका इति दोषाभाववादिना दो
षाभावस्य कारणतावच्छेदकत्वादिना तत्सत्त्वेपि दोषाजन्यत्वेनैव तुल्यत्वादिति भावः शब्दाभासोच्छेदः भ्रमजनकशब्दोच्छेदः ईश्वरकर्तृ
कत्वात् ईश्वरीयवाक्यार्थज्ञानजन्यत्वात् तस्य कार्य्यमात्रकारणत्वादिति भावः तद्धि वाक्यार्थस्येति भ्रमजनकवाक्यार्थस्य भ्रमत्वेन वा
प्रितत्वेनेत्यर्थः संप्रदायविद इति अस्वरसोद्भावनं तद्बीजं तु यथा शब्दप्रमात्वेन कार्य्यत्वं यथार्थवाक्यार्थज्ञानत्वेन कारणता इति का हे॰ ख॰
र्य्यकारणभावसत्त्वादृष्टादिकस्थले तज्जन्यैव शाब्दप्रमेति परिशेषात् तदाश्रयेश्वरसिद्धिः तथा शब्दभ्रमत्वेन कार्य्यता वाक्यद्वारा अ १४७

यथार्थवाक्यार्थज्ञानत्वेन कारणता इति कार्य्यकारणभावसत्वाद्विसंवादि शुकादिवाक्यस्थलेपि तज्जन्यएव भ्रम इति परिशेषाद्य
थार्थवाक्यार्थज्ञानयोन कश्चन सिद्ध्यतु शाब्दभ्रमं प्रति एवं कार्य्यकारणभावे च मानाभावः तदा शाब्दप्रमां प्रत्यपि तत्कार्य्ये कारणभा
वे मानाभाव इति स्थितेः सकर्तृकत्वाद्यनुमानेनैव ईश्वरसिद्धिः ननु प्रमायागुणजन्यत्वे नित्यादृ अनुम इत्यादिना योग्यताज्ञानं एक
पदार्थः परपदार्थसंसर्गरूपा अतीतानागतसंसर्गस्य तत्वे व्यभिचारात् किंतु एकंपदार्थे परपदार्थसंसर्गाधिकरणत्वरूपा स्वामि
ति अन्याभिधाने विसंवादिनि एव मिलतु तत्र यः एवं योग्यताज्ञानयथार्थवाक्यार्थस्य वाधितत्वात्सत्वादिति कारणापटर जन्य संवादादि
वाक्यस्थले तु योग्यताज्ञानं प्रमैवेत्यर्थः तत्र वाक्यार्थस्यावाधितत्वादिति भावः अथ योग्यताचे गुणः तदन्यत्र कदापि त्वस्वरूपसतियो
ग्यतावर्त्तते शाब्दप्रमा कथं न जायते इत्यत आह एकविदिति तथाच शाब्दबोधसामान्यकारणयोग्यताज्ञानाभावादेव कार्य्याभाव इ
ति भावः अथ यत्र विष्णुर्वो धेछया हरिरस्तीति वाक्यं प्रयुक्तं तात्पर्य्यभ्रमेण यथार्थयोग्यताज्ञानसत्वात्तिं दृ प्रमायातु तातात
त्रापि [illegible] अथ यत्र वाक्यं प्रमाणं स्यादित्येवाह नन्विति अन्यपरात् अन्यतात्पर्य्यका तात्पर्य्यज्ञानस्य कारणत्वपक्षे आह तवि
नैवेति तात्पर्य्यभ्रमं विनैवेत्यर्थः संवादपरवाक्यस अवाधितापरवाक्यं एवं च तत्र तद्वाक्यस्याकथं न प्रमाणत्वेत व्यवहार इत्यत आह

प्र·ख· तात्पर्यविषये चेति तात्पर्यविषये वक्तुर्बोधेच्छाविषयस्यार्थस्य इति न प्रमाणमिति न प्रमाणत्वेन व्यवक्रियते ननु शाब्दप्रमायां हि वक्तृ
१४८ यथार्थवाक्यार्थज्ञानस्य हेतुत्वकल्पने गौरवं यद्यपि तथापि लौकिकस्थले प्रमाणशब्दं प्रति तस्य हेतुत्वकल्पनात् शाब्दप्रमायामपि तदे
वहेतुः अन्यथा प्रमाजनकत्वे प्रमात्वे प्रमाणत्वप्रयोजकमपि तत्र स्यात् इत्याद स्यादेतदिति शब्दे शाब्दप्रमायां हेतुत्वात् तद्धेतुत्वेन क्त
मस्यात् अन्यथा प्रमायाजनकत्वे प्रमाणत्वप्रयोजकता न स्यादिति भावः अथ प्रमाणशब्देपि न यथार्थवाक्यार्थज्ञानं हेतुरित्यत्वेतियत
एव प्रमाणशब्दं प्रति यथार्थवाक्यार्थज्ञानं हेतुयततएवेत्यर्थः वक्तृज्ञानानुमानमिति प्रमाणशब्देन वक्तृयथार्थवाक्यार्थज्ञानानुमानमि
त्यर्थः एवं चेदिदं स्वतन्त्रवाक्यार्थगोचरयथार्थज्ञानजन्यप्रमोपधायकशब्दत्वादित्यर्थः स्वतन्त्रशाब्दाप्रयोज्यत्वं रातेनाध्यायकस्य वेदज
न्यवाक्यार्थगोचरयथार्थज्ञानजन्यतया न सिद्धसाधनं न चैवं शाब्दवाक्यार्थेनानजन्यप्रमाणशब्दे व्यभिचार इति वाच्यं तत्रापि परमे
श्वरज्ञानमादाय साध्यसत्वादिति भावः इतीश्वरसिद्धिः इत्यनेनानुमानेनापीश्वरसिद्धिः प्रमाणशब्दत्वं हि शब्दस्य प्रमोपधायकत्वं हि न
नु शाब्दस्य प्रमोपधायकत्वं कथं यथार्थवाक्यार्थज्ञानपूर्वकत्वं विना संभवति प्रमां प्रति यथार्थवाक्यार्थज्ञानस्य हेतुत्वादित्यत आह हेरंब·
आवश्यकेति यथार्थेति यथार्थतज्ज्ञानता प्रमा जायत इत्युपपादितमित्यर्थः ननु कथं प्रयोजकं प्रमोपधायकशब्दत्वेन का १४८

र्थता यथार्थवाक्यार्थज्ञानत्वे कारणता इति कार्य्यकारणभावसत्वादित्येवाह तथापीति वाक्यार्थज्ञानं यथार्थवाक्यार्थज्ञानं तेन विना यथार्थ
वाक्यार्थज्ञानं विना कथं तत्कथं प्रमाणवाक्यं शब्दस्वरूपं अथ वाक्यमात्रशब्दवाक्यार्थज्ञानं न कारणं न च नियतपूर्ववर्त्तिभावात् कथं कारणं
४३ नेति वाच्यं इत्यर्थ प्रयोज्यस्य वाक्यार्थज्ञानं भवति प्रतिप्रयुक्तविज्ञानं तरं वाक्येन तादृशयदात्वा वाक्यार्थज्ञास्यतीति इष्टसाधनताज्ञा
नं जानं जायते ततो वाक्य प्रयोगं क्रियते इति नियतपूर्ववर्त्ति वाक्यार्थज्ञानं किं तु तदन्यथासिद्धमित्येवाह प्रकृत्यादीति इद्वेष्टपत इद्धि
षयकइछानंतरं इति वृद्धवाक्यप्रयोग इति प्रथमवक्तृ वाक्यार्थज्ञानमित्यन्वयः प्रथमं पूर्ववर्त्ति अन्यथासिद्धं किं तु तदन्यथासिद्धं अ
थ केन अन्यथासिद्धमित्यत आह तादृशपदसमूहस्यापि प्रत्येकपदहेतोरेव प्रत्येकपदहेतोस्तत्तत्पदज्ञानत्वेन अर्थेतिपत्ता सर्व्वं को
वेदः तत्रप्रामाण्यमित्यर्थः अध्ययवेदं द्विनावेदार्थगोचरज्ञानं न जातमेतावता किं वेदेनैव वेदार्थज्ञानं उत्पत्स्यते ततः तत्प्रतीतीच्छया
उच्चारणं भवेदित्यत आह न चेति तत्र वैदिकस्थले वेदाद्वेदवेदार्थज्ञानं भविष्यति ततः तत्प्रतीतीच्छयोच्चारणं भवेदिति पतित न चेत्यर्थः अ
न्योन्येति किं परोच्चारितवेदाद्वेदार्थज्ञानं भविष्यति ततदा [redacted] प्रतीतीच्छया उच्चारणंभावात् किं वा स्वोच्चारितवेदात्
स्वस्य वेदार्थज्ञानं भविष्यति तदा तत्प्रतीतीच्छया उच्चारणं भेदात् नाद्यान्तरा परस्यैव वेदार्थज्ञानं कथं न च अन्योच्चारितवेदस्तथा च न व

प्र॰ख॰ स्यानात् तांत्स्यः स्वस्यवेदार्थज्ञानेसतितत्प्रतीतीछयावदोच्चारणं वेदे उच्चारिते अस्माद्वेदार्थज्ञानमित्यन्योन्याश्रयादित्यर्थः तस्यादनव
१४९ स्था अन्योन्याश्रयभंगायवेदाजन्यवेदार्थप्रतीतिछा अवश्यं वेदोच्चारणे हेतुर्वाच्यमिति भावः ॥ अतइतियतो वेदउच्चारणे वेदजन्यवे
दार्थप्रतीतीछाहेतुर्वतइत्यर्थः सकलवेदार्थदर्शिनावेदाजन्यसकलवेदार्थदर्शिनासवेदः तत्रतस्मिन्नर्थे इतीति भावः तस्याप्रमाणतां ता
दृशेछैवगुणइत्यर्थः तस्यवेदस्यअस्मदादिवेदार्थप्रतीतीछयोच्चरितत्वभावादितिभावः । तादृशीछा वेदाजन्यवेदार्थप्रतीतीछातदाश्रयः
वेदाजन्यवेदार्थप्रतीतीछाश्रयःस्वतंत्रोतिशब्दाप्रयोज्यज्ञानुवत्सुरुवस्येष्वसिद्धिरित्यर्थः मीमांसादीति अस्यवेदस्यायमेवार्थः अयनार्थ
र्थइतिविनिगमकप्रमाणसहकारादित्यर्थः वेदार्थेति वेदार्थयथार्थविदोऽध्यायकस्यैव वेदार्थप्रतीतीछास्तिसाएवगुणइत्यर्थः ननु
अध्यायकस्यैव वेदार्थप्रतीतिकथं वेदार्थस्यातींद्रियत्वादित्यत आहएवमिति एवं एवं प्रकारेण विनिगमकप्रमाणसहकारेणे
तियावत्तादृशं वेदार्थज्ञानवानतथाचविनिगमकप्रमाणसहकारेणवेदार्थज्ञानवत्पूर्वोध्यायकेनेति अध्यायकेनेत्यंतत्पूर्वप्रती
कसमं(र्थो)दार्थः आनादिरिति तथाचानाद्यनवस्थानदूषणाचइतिभावः ॥ नवेतिततः तद्वाक्यात् अर्थप्रत्ययः शाब्दबोधः तस्मादित्यर्थः शाब्द दे॰खं॰
बोधसामान्यकारणतात्पर्यज्ञानाभावादितिभावः तस्यरत्वंता त्प्रतीतिहृयोच्चरितत्वं वेदानुपूर्व्यानित्यत्वादितिभावः शाब्दखंडेदूषा १४९

षिष्यमानत्वात्प्रागुक्तमदूषयित्वैव प्राभाकरमतं आह प्राभाकरास्त्विति प्रामाण्यमिति घटत्वादिप्रमाण्यमित्यर्थः प्रामाण्यं नैकं किंतु घटत्वा-
प्रामाण्यं घटत्वाप्रामाण्यं प्रत्येकमेव पक्ष अत एवेति स्वतउत्पत्तिकं स्वतोग्राह्यं चेत्यर्थः। घटत्वप्रकारक ज्ञानसामग्री जन्ययावज्ज्ञानवृ-
त्तित्वं स्वतउत्पत्तिकत्वं घटत्वप्रकारक ज्ञानसामग्रीजन्ययावज्ज्ञानविषयत्वं च स्वतोग्राह्यत्वं ननु प्रमाण्यं अनुभवत्वगर्भं वक्तव्यं स्वतउत्प-
त्तिकं स्मृत्यवृत्तेरित्यत आह तथा हीति ज्ञानमात्रसामग्रीजन्यं ज्ञानसामग्रीजन्यज्ञानमात्रवृत्तिः अत्र मात्रपदं साकल्यार्थकं ननु प्र-
मायां गुणदोषाभावजन्यत्वात्प्रामाण्यं कथं ज्ञानसामग्रीजन्ययावज्ज्ञानवृत्तित्वं गुणदोषाभावाजन्यज्ञानावृत्तित्वादित्यत आह नचेति-
(अपेक्षतेप्रमेति शेषः ननु गुणादिश्चेन्न कारणं तदा तत्कुतः भ्रमोत्पत्तिसमये कथं तत्र प्रमोत्पत्तिर्नेति ज्ञानसामान्यसामग्र्यास्तन्न व्यभिचा-
र इत्यत आह सत्त्वेति अथ ज्ञानं चेत्तदा यथार्थं तदा। अयथार्थः क इत्यत आह अयथार्थस्त्विति व्यवहारः प्रवृत्तिः बाध्यत्वाद्भ्रमत्वेन ज्ञानत्वा
ज्ञानमपि प्रमात्वेन ज्ञायते तत् कथं तदयथार्थमित्यत आह ज्ञानं हीति प्रबोध्यतेन भ्रमत्वेन ज्ञायते बाधकाभिमतेति बाधकाभिमतज्ञानं प्रमा
त्वेन तुल्यत्व प्रमात्वेन रूपेण तथा च प्रमात्वादिति समुदायार्थः प्रमा च भ्रमत्वेन न ज्ञायते अन्यथाख्यात्यभावादिति भावः। नन्वेवमिदं ज्ञानम
यथार्थमिति कथं व्यवहार इत्यत आह ज्ञाने चेति प्राचीनैरुच्यते इति शेषः विपरीतव्यवहारेति अयथार्थप्रवृत्तिजनकत्वनिबद्धतद्रूस

प्र·ख·
१५०

र्थः तथाच तत्र भाक्तो व्यवहार इति भावः अथ अयथार्थव्यवहारस्थलक्षण्यया समर्थनेपि अप्रमात्वव्यवहारस्तत्र कथं समर्पणीयः सर्वांश
यांयथार्थेन ज्ञानस्याप्रामाण्याभावाद् प्रामाण्यं परतउत्पद्यत इति प्राचीनैर्वा कथं उच्यते इत्यत आह अथेति प्रामाण्यत्वे प्रामाण्यस्वरूपत्वेनात द्
नंतरं तस्य च सर्वधीवृत्तित्वादिति पूरणीयं रजते तिशुक्तौ रजतज्ञानं कथं मप्रमाणत्वेन व्यवह्रियत इत्यर्थः परतउत्पद्यत इति प्राचीनैर्वा
कथं उच्यते इत्यर्थः किं त्विति अयथार्थप्रवृत्तिजनकत्वमित्यर्थः तथाच्च नाप्रमात्वव्यवहारानुपपत्तिरिति भावः अयथार्थप्रवृत्तिजनक
त्वं तज्जननयोग्यत्वं तच्च सहकारियोगित्वं अथात्मसमवहितत्वसंबंधेन तादृशप्रवृत्तिसहकारिमत्वमेवेत्यर्थः वसवदोषसहकृते ज्ञान
सामान्यसामग्रीहेतुको धर्म्मधार्म्मिणोरसंसर्गाग्रहः दोषहेतुकधर्म्मधर्म्मसंसर्गाग्रहाधीनो दोषसहकृतज्ञानसामान्यकारणक
लापाधीनेना धर्म्मधर्म्मिविषयकज्ञानत्वघटकत्वासंसर्गग्रहस्थैत्यभिप्रामाण्यप्रामाण्ये परतस्त्यरत इति प्राचीनप्रवादसंगमयतित
चेति तच्चाप्रामाण्यं ज्ञानसामग्र्यां दोषानुप्रवेशात् धर्म्मधर्म्मिणोरसंसर्गाग्रहरूपं उत्पन्ने ज्ञाने उत्पन्नधर्म्मधर्म्मिविषयक ज्ञानद्वयोर्दोष
हेतुत्वात्का संसर्गाग्रहात् दोषहेतुकधर्म्मधर्म्मिणोरसंसर्गाग्रहादोषसहकारत्वात् दोषसहकृतज्ञानसामान्यकारणकलापाधीनत्वात् ज्ञान हे·रं·
ज्ञानद्वयोरेकत्वासंसर्गाग्रहसहितं भवतीति योजना सहितमित्यनंतरं भवतीत्यध्याहाराद्दोषानुप्रवेशादित्यत्राधीनत्वं पंचम्यर्थ अनु १५०

पश्चादस्य संसर्गाग्रह एवमुक्तस्तत्रापि परत उत्पद्यते अतः उत्पद्यते अतः परतः उत्पत्तिकत्वव्यवहारविषय इति यावत् तन्नु ज्ञानमात्रेति न पुन
रप्रमात्वाश्रये ज्ञाने जन्यतासंबंधेन ज्ञानसामान्यसामग्र्या अतिप्रसक्तत्वादित्यर्थः तथा चाप्रमात्वावत्प्रमात्वेपि परत उत्पत्तिकत्वव्यवहा
रापत्तिरिति भावः। अथ प्रामाण्यं परतो गृह्यत इति सिद्धांतः कथं संगच्छते इत्यत आह तन्नीयत इति वाध्यकाद्यापकस्येत्याप्यप्रका
रकप्रवृत्तिजनकत्वात्तस्य विपरीतप्रवृत्तिजनकत्वस्य त्वेन ज्ञातेन तदनुव्यवसायेन ज्ञानानुव्यवसायेन। इदानीं नैयायिकोक्तं दोषतदभा
वस्य कारणत्वं दूषयति ज्ञानस्वरूप इति नैयायिकमतेनापि दूषणमाह ज्ञानाय यथार्थे त्वादिना नांतरीयकारित्वेनेन यथार्थत्वयथार्थत्व
विशिष्टं दोषाभावात्वेपि जायत इति शेषः नन्वेवं भ्रमोपि ज्ञानसामग्रीमात्रात्स्यात्किं दोषस्य कारणत्वेनेत्यत आह असदर्थविषयेति अ
सदर्थः ननु भ्रमस्य दोषमात्रकारणकत्वे ज्ञानत्वं न स्यात् विषयकत्वं विशेष्यावृत्तिप्रकारकत्वं इंद्रियाणामिति इंद्रियाणां असन्निकृष्टासदर्थवि
षयकज्ञानजनने सामग्र्याभावादित्यर्थः ननु भ्रमस्य दोषमात्रकार्यत्वे ज्ञानत्वं न स्यात् अतो दोषसहकृतज्ञानसामान्यसामग्र्या हेतुत्वं वा
च्यं एवं चेद्दोषाभावसहकृताया एव तस्याः प्रमाहेतुत्वं वाच्यं अन्यथा ज्ञानसामग्र्यैव प्रमासामग्री तज्जन्यत्वे भ्रमस्यापि प्रमानुप्रसंगा
दित्याशंकते नन्विति यथार्थत्वयथार्थत्वावछिन्ने अन्यथा ज्ञानसामग्र्येव प्रमासामग्री तज्जन्यत्वेन भ्रमस्यापि प्रमात्वप्रसंगादिति

प्र·ख· भावः सैव सामग्रीति तथा च दोषनिरपेक्षज्ञानसामग्रीजन्यत्वमेव प्रमात्वव्याप्यमिति भावः सैव ज्ञानसामान्यसामग्र्येव विरोधाद्दोषतद
१५१ भावयोर्विरोधात् अयथार्थांशे दोषभावः तत्प्रमायाः कारणं चाच्यंत तदाप्यत्रापि इदं रजतमिति भ्रमस्य रजतत्वांशे दोषोस्ति तथापि शुक्तित्वांशे
तदभावोऽस्त्येवेत्यत आह अयथार्थेत्यथार्थत्वे इति नांतरीयको अन्यथासिद्धो यथाऽस्मन्मतेऽयथार्थत्वविशिष्टे दोषः अन्यथासिद्धः
तथा भवन्मतेपि प्रमायां दोषभावः अन्यथासिद्ध इत्यर्थः यथाश्रुतं तु न सम्यक् पूर्वं स्वयमेव असदर्थविषयकता दोषादित्युक्तत्वात् तस्य
मं प्रति इदानीं दोषकारणत्वे विवादाभावात् ननु प्रामाण्यस्य स्वतउत्पत्तिकत्वमुपपादितं स्वतो ग्राह्यत्वं कथमित्यत आह यथार्थत्वं चे
ति अर्थस्य स्वविशेष्यस्य स्वविशेष्ये स्वविषयीभूतप्रकारकत्वमिति निष्कर्षः इदमिति इदं तु विषयितया ज्ञानवृत्तिधर्मत्वमित्यर्थ
स्य विशेष्यस्य तथा च तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वमिति निष्कर्षः इदमिति इदं रजतमिति ज्ञानमित्यनेन स्वार्थनिश्चयरूपमित्यस्या
न्वयः तथा च इदं रजतमिति स्वार्थनिश्चयरूपं ज्ञानमित्यर्थः स्वस्येति स्वस्य रजतत्वाश्रयविशेष्यकत्वं रजतत्वप्रकारकत्वं चेत्यर्थः परिष्कृत्य दर्श
यति स्वविषयीकरोतीति यावत् ननु विशेष्याद्यत्प्रकारकत्वं तत्कथं स्वतो ज्ञेयमित्यत आह तदतिरिक्तं चेति ज्ञानोल्लिखितप्रकारकत्वा दे·रं·च·
द्यतिरिक्तं न प्रामाण्यपदवाच्यमित्यर्थः मानाभावात् प्रामाण्यपदवाच्यत्वे मानाभावात् अस्तु वेति तदपि तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्व १५१

मपितथाचतद्विशेष्यकत्वेसतितत्प्रकारकत्वरूपप्रामाण्यमपिस्वतोज्ञायतांपरतोवाज्ञायतीतिविचारोवाअस्तीत्यर्थःकिंतदितिकिंत
स्यस्वतोग्राह्यत्वनिरूपणेप्रयोजनाभावइत्यतआहमदन्ताविति प्रवृत्त्युपयुक्तंप्रामाण्यंस्वतोग्राह्यंपरतोग्राह्यंवेत्येवविवादःकिंवितिरा
वंरूपोयंमर्थइतिनिश्चयरूपज्ञानंतदुतित ॥५॥ नेत्यर्थः ननुप्रामाण्यंस्वतोग्राह्यंपरतोग्राह्यंवेतिद्विविवादःतद्दारातस्यापिप्रामाण्यत्वे
नस्वतग्राह्यत्वविचारविषयत्वात्कथंतस्यस्वतोग्राह्यत्वनिरूपणे ५॥ त्प्रकारकत्वरूपज्ञानप्रामाण्यनिश्चयधीनमित्यर्थः तथाचवरातस्या
पिपरस्परयाप्रवृत्त्युपयुक्तत्वमितिभावः सद्वमितिरजतरूपोयमित्याकारकंस्वार्थनिश्चयरूपंसद्वेदिज्ञानंक्रमसामग्रीतरावउत्पद्यतइ
त्यर्थः परोक्षेपेतितद्विशेष्यकत्वेसतितत्प्रकारकत्वंनिश्चयापेक्षेत्यर्थः अतएवेतियतरावप्रवृत्त्युपयुक्तंविशेष्येप्रकारीभूतधर्मव
त्वंस्वयमेवपरिछिद्यतइतिभवन्मतेपिप्रवृत्त्युपयुक्तप्रामाण्यस्यस्वतोग्राह्यइत्यर्थः रातजज्ञानमितिप्रामाण्यनिश्चयनिरपेक्षंज्ञा
नमित्यर्थःनस्वार्थनिश्चयरूपमितिप्रामाण्यनिश्चयस्यैवस्वार्थःनिश्चयेप्रतिहेतुत्वादितिभावः व्यर्थमितिअर्थनिश्चयकारण
त्वेनाभिमतंप्रामाण्यज्ञानंव्यर्थफलाजनकमित्यर्थः प्रामाण्यनिश्चयत्वरूपकारणतावच्छेदकनाक्रांतत्वादितिभावः।अथतदा
किंप्रामाण्यज्ञानंव्यर्थफलाजनकमित्यर्थः प्रामाण्यनिश्चयत्वरूपकारणतावच्छेदकनाक्रांतत्वादितिभावः।अथतदाकिंप्रा

प्र॰ख॰ माणज्ञाने प्रामाण्यनिश्चयो न भवतीत्यत आह यदाहितेति इदं प्रमाणं वेति संशयो न स्यात् प्रवृत्त्युपयुक्तप्रामाण्यसंशयो न स्यादित्यर्थः
१५२ प्रवृत्त्युपयुक्तप्रामाण्यसंशयः अनुभवसाक्षिक इति भावः ॥ निश्चित इति तथा च भवन्मते प्रवृत्त्युपयुक्तं प्रामाण्यं अर्थस्य तथात्वं कथं त
त्र संशयः तेन अर्थस्य तथात्वेन प्रवृत्त्युपयुक्तं प्रामाण्यं किं तु तत इति तत्प्रकारकत्वमेव प्रवृत्त्युपयुक्तमिति भावः अनुभवमतं गीकृत्याह न
हीति सत्यत्वासत्यत्वसंशयः प्रामाण्याप्रामाण्य संशयः सत्त्वादिति तथा च ज्ञानत्वावच्छेदेनैव प्रामाण्यस्य ग्रहीतत्वात्तद्वत्ताज्ञा
ने सति कथं प्रामाण्यसंशय इति भावः सचेति कारणेति असंसर्गाग्रह प्रयोजकदोषसंशयादित्यर्थः अथ तत्संशयस्य निवर्तककं इ
त्यत आह सचेति ज्ञानांतरात् एककोटिज्ञानात् स्मृतिसाधारण्यात् ज्ञानसामग्रीजन्यत्वस्मृतिवृत्तित्वात् ननु एवं अनुभवे एव स्य प्र
मात्वव्यवहारः स्मृतौ अप्रमात्वव्यवहार इति कथमित्यत आह स्मृत्यनुभवयोरिति सापेक्षत्वं संस्कारसापेक्षत्वं निरपेक्षत्वं सं
स्कारनिरपेक्षत्वं इंद्रियानां संस्कारसापेक्षे प्रमापदस्याशंकेता संस्कारनिरपेक्षे प्रमापदस्य शंकेतादित्याभिप्रायः ॥ यथार्थेति यथा
र्थेन भावामानमिति व्यवहारस्तु संस्कारनिरपेक्ष्य तया इष्यत इत्यर्थः ॥ मीमांसकैकदेशिसंवादमाह अत्र बुम इति प्रामाण्यसंश हे॰ख॰
याच्च प्रवृत्त्युपयुक्तप्रामाण्यसंशयाच्च सत्त्व एव विशिष्टज्ञानत्वसंशय एव ज्ञानांतरादिविशिष्टज्ञानत्वनिश्चया इत्व अर्थतथात्वस्या १५२

निश्चय इतिशेषः तत्संशयाभाववद्वितस्येति विशिष्टज्ञानत्वसंशयाभाव अर्थतथा च निश्चययोरुभयोः प्रवर्त्तकत्वेगौरवात् ला
घवात् एकस्य विशिष्टज्ञानत्वनिश्चयस्य कारणत्वं कल्प्यत इत्यर्थः ननु प्रामाण्यपदशक्यनिश्चयः प्रवृत्तिप्रति कारणं न तु अर्थत
थात्वमेव न तु विशिष्टज्ञानत्वमित्यत आह अपि चेति सामान्यं प्रामाण्यंपदशक्यं भ्रमव्यावृत्तं भ्रमाभिन्नेत इति क्रमेण व्यवहारातिक्रमे
अगृहीतासंसर्गेति प्रमात्वपस्थितेः पूर्वलक्षण उपस्थिति सामग्री विरहात्सामग्रीविरहात्समुदायोपस्थितिसामग्रीविरहात्तथा च
गृहीतासंसर्गादेरेकदेशोपस्थितिसामग्र्याविरहेण समुदायोपस्थितिसामग्रीविरहादित्यर्थः। यथाश्रुतं तु तत्सम्यक्परत्वे विशि
अ ष्टज्ञानस्यविशेषणज्ञानाजन्यत्वात् ज्ञानलक्षणानङ्गीकाराच्च यथाविशिष्टज्ञानत्वमेव चेत्प्रामाण्यं तदा तत्स्वतो न गृह्यत इति प्र
मायाः स्वप्रकाशत्वव्याघातः यतः स्वस्ववृत्तिप्रामाण्यादिविषयकत्वमेव स्वप्रकाशत्वमित्यत आह स्वप्रकाशतां हीति स्वमात्रला
क्षिणी स्वविषयकत्वमात्रं स्वप्रकारत्वं न तु स्ववृत्तिप्रामाण्यादिविषयकघटितमिति समुदायार्थनिष्कर्षः अन्यथा तदघटि
तत्वे तस्य विशिष्टज्ञानत्वरूपप्रामाण्यस्य अतएवेति यतएव ज्ञानसामग्रीजन्यत्वव्यापकं न प्रामाण्यमतएवेत्यर्थः तथा ला
पत्तेः प्रामाण्यापत्तेः व्याप्यसत्वादिति भावः न चास्त्विति प्रामाण्यं स्वतः अप्रामाण्यं परत इति प्राचीनमीमांसकग्रन्थः प्रभाक

निश्चयपदृइतिशेषः तत्संशयाभावसद्धितस्येति विशिष्टज्ञानत्वसंशयाभाव अर्थतथात्वनिश्चययोरुभयोः प्रवर्त्तकत्वेगौरवात् ला
घवात् एकस्य विशिष्टज्ञानत्वनिश्चयस्य कारणत्वं कल्प्यत इत्यर्थः ननु प्रामाण्यपदशक्यनिश्चयः प्रवृत्तिप्रति कारणं न तु अर्थत
थात्वमेव न तु विशिष्टज्ञानत्वमित्यत आह अपि चेति सामान्यं प्रामाण्यं पदशक्यं भ्रमव्यावृत्तेः भ्रमाभिन्नेत इति क्रमेव्यवहारातिक्रमे
अगृहीतासंसर्गेति प्रमात्वपस्थितेः पूर्वलक्षणे उपस्थिति सामग्री विरहात्सामग्रीविरहात्समुदायोपस्थितिसामग्रीविरहात्तथा च
गृहीतोसंसर्गादिरेकदेशोपस्थितिसामग्र्याविरहेण समुदायोपस्थितिसामग्रीविरहादित्यर्थः ।यथाश्रुतं तु तत्सम्यक परं तत्र ये विशि
ष्टज्ञानस्य विशेषणज्ञानाजन्यत्वात् ज्ञानलक्षणानङ्गीकाराच्च यथा विशिष्टज्ञानसमेवचे प्रामाण्यं तदा तत्त्वतो न गृह्यत इति प्र
मायाः स्वप्रकाशत्वव्याघातः यतः स्वस्ववृत्तिप्रामाण्यादिविषयकत्वमेव स्वप्रकाशत्वमित्यत आह स्वप्रकाशतावादीति स्वमात्र ला
क्षिणी स्वविषयकत्वमात्रं स्वप्रकारत्वं न तु स्ववृत्तिप्रामाण्यादिविषयकघटितमिति समुदायार्थनिष्कर्षः अन्यथा तदघटि
तत्वे तस्य विशिष्टज्ञानत्वरूपप्रामाण्यस्य अतएवेति यतएव ज्ञानसामग्रीजन्यत्वव्यापकं न प्रामाण्यमतएवेत्यर्थः तथा ला
पत्तेः प्रामाण्यापत्तेः व्याप्यसत्वादिति भावः न चास्त्विति प्रामाण्यं स्वतः अप्रमाण्यं परत इति प्राचीनमीमांसकग्रंथः प्रभाक

प्र·ख·
१५३

रामिति ।: स्वत उत्पत्तिकत्वपरत उत्पत्तिकत्वपर व्याख्यात मीमांसकनव्यैस्तु: अन्यथैव व्याख्यायत इत्यर्थ व्याख्यायंते तवेवाह अविद्य
माणिप्रामाण्यं मीमांसकग्रन्थ प्रामाण्यपदं वाच्यमित्यर्थः स्वतःसिद्धत्वेन परतो ऽनुत्पद्यमानत्वेन उच्यत इत्यस्य मीमांसकैरिति शे
षः तथाच परतो ऽनुपद्यतमानत्वमेव स्वतस्त्वमिति भावः अप्रामाण्यं परत इति मीमांसकग्रंथमुपपादयति विद्यमान इति भेदग्रह
शक्ति भेदग्रहस्य सकलकारणसत्वे उत्तरकाले इति प्रागभावस्योत्तरकाले सत्वात् रूपप्रागभावपरिपालनस्य दोषत्वेनाप्रामाण्यप
रत उत्पद्यत इति प्रामाण्य अत इति मीमांसकग्रंथस्यार्थः आद्यंस्वतोग्राह्यत्वेनोक्तं प्रमात्वपारपेते पूर्वं क्षणे उपस्थितिसामग्रीवि
रहादित्यर्थः तथाच प्रामाण्यं अत इति मीमांसकग्रंथ उपपादितः तथाच प्रामाण्यं स्वतोग्राह्यत इति यथास्तु मुपपन्नमेव इतिभा
वः॥ ॥उत्पत्तिवादरहस्यं॥ ॥प्रमात्वगुणस्य कार्य्यतावच्छेदकमित्यभिधानेन घटयति अथ किमिति यत्प्रमात्वं कार्य्यतावच्छे
दकमुच्यते तत्प्रमात्वं किमित्यर्थः ॥ मिथ्यास्तु प्रामाण्यं न स्वाश्रयग्राह्यमित्यादि स्वतोग्राह्यत्वाभावसाधकानुमाने स्वरूपे ष्टय पक्षे ३
गिति अथ किमिति यत्प्रामाण्यं पक्षीकृत्य स्वाश्रयग्राह्यत्वाभावः साध्यते तत्प्रामाण्यं किमित्यर्थः इत्याह ॥ निर्विकल्पकादिव्या हेतुख·
वृत्तेजातिविशेषः एव प्रामाण्यं तच्च भावत्वादिवत्सप्रतियोगिकं तेन रंगत्वस्य प्रमारजतस्य प्रमा इत्यादि व्यवहारोपपत्तिस्वस १५३

समवायवत् तत्त्वं प्रतियोगिकमेव लाघवात् ननु प्रतियोगिभेदाद्भिन्नगौरवात् । इत्थं रंगरजते इति समूहालम्बनं न प्रमायां रंगत्वप्रति
योगिकप्रमात्वरजतत्वप्रतियोगिकप्रमात्वयोः सांकर्य्यप्रसंगाच्च तत्तत्प्रतियोगिकत्वविशिष्टनिरूपिताधिकरणत्वविरहाच्च नातिप्रसंगः
इति केषांचिन्मतमाशंकां निराकरोति न तावज्ज्ञातिरिति प्रत्यक्षत्व इति ज्ञानत्वविशिष्टप्रत्यक्षोत्पत्तिसमये प्रमात्वस्यापि विशिष्टप्रत्यक्ष
विषयत्वेन तदनंतरं प्रामाण्यतदभावोपस्थित्यात्मस्य संशयानुपपत्तेः न त्वेवं चेत् स्थाणुत्वादेर्योग्यव्यक्तिवृत्तितया स्थाणौ इंद्रियसन्निकर्षे धर्मि
तावच्छेदकप्रकारकप्रत्यक्षदशायां स्थाणुत्वस्य प्रत्यक्षाय इत्थं कथं तत्संशय दोषप्रतिबंधात्तदानीं स्थाणुत्वस्य प्रत्यक्षमिति चेत्प्रमात्वेपि तु
वचनादित्यत आह प्रमात्वसंशयोत्तरं अप्रमेयत्वाच्चेत्यर्थः अन्यथा संशयोत्तरं स्थाणुत्वादिबुद्धिवत्प्रामाण्यबुद्धिरपि प्रत्यक्षस्यात् न तु अनुमि
तिः तादृशस्थले प्रत्यक्षसामग्र्या बलवत्वात् तत्र चेष्टापत्तिः अनुमिनोमीत्यनुव्यवसायादिति भावः ननु तत्र अनुमिनोमीत्यनुव्यवसायो
सिद्ध इत्यरुचेराह साक्षात्त्वादिनेति प्रमात्वं विना साक्षात्त्वं निर्विकल्पके साक्षात्त्वं विना प्रमात्वमनुमित्यादेरेकत्र साक्षात्कारिप्रमायां
तदुभयोः समावेशः संकर इत्यर्थः आदिना चाक्षुषत्वादिपरिग्रहः ननु गुणगतजात्योः शंकरो न दोषाय इत्यत आह द्रव्येति उत्कर्ष
तस्य शंकरस्य ननु तद्रूपत्वादिना सांकर्य्यात् कथं तावत्त्वं संकरत्वं जातिरित्यत आह भावत्वादेरिति उत्कर्षरूपतयेति उत्कर्षत्वं जातिवि

प्र·ख·
१५४

नाऽन्यनिर्वक्तुं शक्यत इत्यभिप्रायः तन्नानात्वात् । तावत्त्वादिः ककारखकारादिभेदेन नानात्वात् । नन्वेवं प्रमात्वेऽपि चाक्षुषत्वादिव्याप्यनि
ष्ठप्रत्यक्षत्वविरुद्धमनमित्यादिसाधारण्यं चैकमनोनसंकरइत्यत आह प्रमात्वेति । अननुगमः अनुगतबुद्ध्यसंभवः ननु अनुगतबुद्धि
रेवासिद्धेत्यत आह किंचेति वस्तुतस्तु त्वनिर्विकल्पकेपि प्रमात्वा

इति

प्रत्यक्षखण्डचिन्तामणिः

मथुरानाथीव्याख्याविलसितः

हेरंब·
१५४